No. ४७५४

Title माध्यान्दिनीयारुद्राभिषेकाध्यायः

Author ×

Extent १२ पत्राणि Age ×

Subject सूत्रपद्धतिः

माध्यन्दिनीयाभिषेकाध्यायः

४७ पत्र

श्रीगणेशायनमः अथषडंगन्यासः तद्यथा· देशकालादीनुच्चार्य्यश्रीसदाशिवप्रीतयेरुद्राभिषेकाद्यनुष्ठानसि
द्ध्यर्थंषडंगन्यासमहंकरिष्ये· इतिसंकल्प· ॐगायत्रीत्रिष्टुब्जगत्यनुष्टुप्पंक्त्यासहबृहत्युष्णिहाककुप्सूचीभिः
शम्यंतुत्वा १ द्विपदायाश्चतुष्पदास्त्रिपदायाश्चषट्पदाः· विछंदायाश्चसछंदाः सूचीभिःशम्यंतुत्वा· २ म
हानाम्न्योरेवत्योविश्वआशाप्रभूवरीर्मेघीर्विद्युतोवाचःसूचीभिःशम्यंतुत्वा· ३ नार्य्यस्तेपत्न्योलोमभिर्विचि
न्वंतुमनीषया· देवानांपत्न्योदिशःसूचीभिःशम्यंतुत्वा· ४ रजताहरिणीःसीसायुजोयुज्यंतेकर्मभिः अश्वस्य
वाजिनस्त्वचिसीमाःशम्यंतुशम्यंति· ५ ॐम्· सहस्तोमासहछन्दसऽआवृतसहप्रमाऋषयःसप्तदैव्या· पूर्वेषां
पंथामनुदृश्यधीराअन्वालेभिरेरथ्योनरश्मीन्· ६ यज्जाग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति· दूरङ्गमंज्यो
तिषांज्योतिरेकंतन्मेमनःशिवसंकल्पमस्तु ७ येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वंतिविदथेषुधीराः य
दपूर्व्वंयक्षमंतःप्रजानांतन्मेमनःशिवसं० ८ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरंतरमृतंप्रजासु· यस्मान्नऋतेकिं रामः
चनकर्म्मक्रियतेतन्मेमनःशिव० ९ येनेदंभूतम्भुवनंभविष्यत्परिगृहीतममृतेनसर्व्वं· येनयज्ञस्तायतेसप्तहोता १
तन्मेमनःशिव० १० यस्मिन्नृचःसामयजूंषियस्मिन्प्रतिष्ठितारथनाभाविवाराः यस्मिंश्चित्तं० सर्व्वमोतंप्रजा

नांतन्मेमनः शिव० ११ सुखारथिरश्वानिवयन्मनुष्यान्नेनीयतेभिशुभिर्वाजिनइव० हृत्प्रतिष्ठंयदजिरंजविष्ठं
तन्मेमनः शिव० १२ शिवसंकल्पः० हृदयायनमः सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् सभूमिंद०
सर्वतःस्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् १ पुरुषऽएवेदं० सर्वंयद्भूतंयच्चभाव्यम् उतामृतत्वस्येशानोयद
न्नेनातिरोहति २ एतावानस्यमहिमातोज्यायांश्चपुरुषः पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ३
त्रिपादूर्द्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ४ ततोविराडजा
यतविराजोऽअधिपूरुषः सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ५ तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृष
दाज्यम् पशूंस्तांश्चक्रेवायव्यानारण्याग्राम्याश्चये ६ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानिजज्ञिरे छं
दांद०सिजज्ञिरेतस्माद्यजुस्तस्मादजायत ७ तस्मादश्वाऽअजायंतयेकेचोभयादतः गावोहयज्ञिरेतस्मा
त्तस्माज्जाताऽअजाऽवयः ८ तंयज्ञंवर्हिषिप्रोक्षन्पुरुषंजातमग्रतः तेनदेवाऽअयजंतसाध्याऋषयश्चये
९ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् मुखङ्किमस्यासीत्किम्वाहूकिमूरूपादाऽउच्येते १० ब्राह्मणोस्यमु
खमासीद्बाहूराजन्यःकृतः ऊरूतदस्ययद्वैश्यः पद्भ्यां० शूद्रोऽअजायत ११ चंद्रमामनसोजातश्चक्षोःसूर्यो

अजायत· श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत· १७ नाभ्यआसीदन्तरिक्षंꣳशीर्ष्णोद्यौःसमवर्त्तत· प
द्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँ२अकल्पयन्· १८ यत्पुरुषेणहविषादेवायज्ञमतन्वत· वसन्तोस्यासीदाज्य
ङ्ग्रीष्मइध्मःशरद्धविः· १९ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः देवायद्यज्ञंतन्वानाऽअबध्नन्पुरुषम्पशु
म्· २० यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन्· तेहनाकंमहिमानःसचन्तयत्रपूर्व्वेसाध्याःसन्ति
देवाः २१ ॐ शिरसेस्वाहा· ॐ अद्भ्यःसम्भृतःपृथिव्यैरसाच्चविश्वकर्म्मणःसमवर्त्तताग्रे· तस्यत्वष्टाविद
2 धद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रे· १ वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णंतमसःपरस्तात्· तमेवविदि
त्वातिमृत्युमेतिनान्यःपन्थाविद्यतेऽयनाय २ प्रजापतिश्चरतिगर्भेअन्तरजायमानोबहुधाविजायते तस्ययो
निम्परिपश्यन्तिधीरास्तस्मिन्हतस्थुर्भुवनानिविश्वा· ३ योदेवेभ्यआतपतियोदेवानाम्पुरोहितः पूर्व्वोयो
देवेभ्योजातोनमोरुचायब्राह्मये· ४ रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्रेतदब्रुवन्· यस्त्वैवम्ब्राह्मणोविद्यात्तस्य एमः
देवाऽअसन्वशे ५ श्रीश्चतेलक्ष्मीश्चपत्न्याऽवहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्· इष्णन्निषा २
णामुम्मइषाणसर्व्वलोकम्मइषाण ६ ॐ शिखायैवषट् आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभ

णश्चर्षणीनाम्· संक्रन्दनोनिमिषऽएकवीरः शतꣳसेनाऽअजयत्साकमिन्द्रः · १ संक्रन्दनेनाऽनिमिषेणजिष्णु
नायुत्कारेणदुश्च्यवनेनधृष्णुना· तदिन्द्रेणजयततत्सहध्वंयुधोनरऽइषुहस्तेनवृष्णा २ सइषुहस्तैः सनि
षङ्गिभिर्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन· सꣳसृष्टजित्सोमपाबाहुशर्द्ध्युग्रधन्वाप्रतिहिताभिरस्ता ३
बृहस्पतेपरिदीयारथेनरक्षोहामित्राँ२ऽअपबाधमानः प्रभञ्जन्सेनाः प्रमृणोयुधाजयन्नस्माकमेध्यविताऽरथा
नाम्· ४ बलविज्ञायस्थविरः प्रवीरः सहस्वान्वाजीसहमानऽउग्रः अभिवीरोऽअभिसत्वासहोजाजैत्रमिन्द्र
रथमातिष्ठगोवित्· ५ गोत्रभिदङ्गोविदंवज्रबाहुञ्जयन्तमज्मप्रमृणन्तमोजसा· इमꣳसजाताऽअनुवीर
यध्वमिन्द्रꣳसखायोऽअनुसꣳरभध्वम्· ६ अभिगोत्राणिसहसागाहमानोदयोवीरः शतमन्युरिन्द्रः दुश्च्य
वनः पृतनाषाडयुध्योस्माकꣳसेनाऽअवतुप्रयुत्सु· ७ इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञः पुरएतुसो
मः देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्रम्· ८ इन्द्रस्यवृष्णोवरुणस्यराज्ञऽआदित्यानाम्मरु
ताꣳशर्द्धऽउग्रम्· महामनसाम्भुवनच्यवानाङ्घोषोदेवानाञ्जयतामुदस्थात्· ९ उद्धर्षयमघवन्नायुधा
न्युत्सत्वनाम्मामकानाम्मनाꣳसि· उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानाञ्जयतांयन्तुघोषाः १० अस्मा

कमिन्द्रःसमृतेषुध्वजेष्वस्माकंयाऽइषवस्ताजयन्तु अस्माकंवीराऽउत्तरेभवन्त्वस्माँ२ऽउदेवाऽअवताहवेषु ११
अमीषांचित्तंप्रतिलोभयन्तीगृहाणाङ्गान्यप्वेपरेहि अभिप्रेहिनिर्दहहृत्सुशोकैरन्धेनामित्रास्तमसास
चन्ताम् १२ अवसृष्टापरापतशरव्येब्रह्मसंशिते गच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः १३
प्रेताजयतानरऽइन्द्रोवःशर्म्मयच्छतु उग्रावःसन्तुबाहवोनाधृष्यायथासथ १४ असौयासेनामरुतःपरे
षामभ्येतिनऽओजसास्पर्द्धमाना ताङ्गूहततमसापव्रतेनयथामीऽअन्योऽन्यन्नजानन् १५ यत्रबाणाःस
म्पतन्तिकुमाराविशिखाऽइव तन्नऽइन्द्रोबृहस्पतिरदितिःशर्म्मयच्छतुविश्वाहाशर्म्मयच्छतु १६ मर्म्माणि
तेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् उरोर्वरीयोवरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु
१७ कवचायहुम् ॐविभ्राड्बृहत्पिबतुसोम्यम्मध्वायुर्दधद्यज्ञपतावविह्रुतम् वातजूतोयोऽअभिरक्षतित्म
नाप्रजाःपुपोषपुरुधाविराजति १ उदुत्यञ्जातवेदसन्देवंवहन्तिकेतवः दृशेविश्वायसूर्यम् २ येना रुभः
पावकचक्षसाभुरण्यन्तञ्जनाँ२ऽअनु त्वंवरुणपश्यसि ३ दैव्यावध्वर्यूऽआगतंरथेनसूर्यत्वचामध्वाय ३
ज्ञंसमञ्जाथे तम्प्रत्नथायंवेनश्चित्रंदेवानाम् ४ तम्प्रत्नथापूर्वथाविश्वथेमथाज्येष्ठतातिम्बर्हिषद

६० स्वर्विदम्· प्रतीचीनंवृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे· ५ अयम्वेनश्चोदयत्पृश्निगर्भाज्ज्योति
र्जरायुरजसोविमाने· इममपांसङ्गमेसूर्यस्यशिशुन्नविप्रामतिभीरिहन्ति· ६ चित्रन्देवानामुदगादनीकञ्च
क्षुर्मित्रस्यवरुणस्याग्नेः आप्राद्यावापृथिवीअन्तरिक्षंसूर्य्यआत्माजगतस्तस्थुषश्च· ७ आन
इत्वाभिर्दिवंदधेस्कशस्तिविश्वानरःसवितादेवएतु· अपियथायुवानोमत्सथानोविश्वंजगदभिपित्वेमनीषा·
८ यदद्यकच्चवृत्रहन्नुदगाअभिसूर्य्य। सर्वन्तदिन्द्रतेवसे· ९ तरणिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य्यविश्व
माभासिरोचनम्· १० तत्सूर्य्यस्यदेवत्वंतन्महित्वम्मध्याकर्त्तोर्विततंसञ्जभार· यदेदयुक्तहरितःसधस्था
दाद्रात्रीवासस्तनुतेसिमस्मै· ११ तन्मित्रस्यवरुणस्याभिचक्षेसूर्योरूपंकृणुतेद्योरुपस्थे· अनन्तमन्यद्रुशदस्य
पाजःकृष्णमन्यद्धरितःसम्भरन्ति १२ बण्महाँअसिसूर्यबडादित्यमहाँअसि महस्तेसतोमहिमापनस्यत
द्धादेवमहाँअसि· १३ बट्सूर्य्यश्रवसामहाँअसिसत्रादेवमहाँअसि मह्नादेवानामसुर्य्यःपुरोहितोवि
भुज्योतिरदाभ्यम्· १४ आयन्तइवसूर्य्यंविश्वेदिन्द्रस्यभक्षत· वसूनिजातेजनमानओजसाप्रतिभागन्नदीधिम·
१५ अद्यादेवाउदितासूर्य्यस्यनिरंहसःपिपृतान्निरवद्यात· तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवी

दीउतद्यौः २६ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतंमर्त्यंच हिरण्ययेनसवितारथेनादेवोयातिभुवनानि
पश्यन् २७ ॐ नेत्रत्रयायवौषट् ॐ नमस्तेरुद्रमन्यवउतोतऽइषवेनमः बाहुभ्यामुततेनमः १ यातेरु
द्रशिवातनूरघोरापापकाशिनी तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि २ यामिषुंगिरिशन्तह
स्तेबिभर्ष्यस्तवे शिवांगिरित्रतांकुरुमाहिंसीःपुरुषंजगत् ३ शिवेनवचसात्वागिरिशाच्छावदाम
५ सि यथानःसर्वमिज्जगदयक्ष्मंसुमनाऽअसत् ४ अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् अहींश्च
सर्वाञ्जम्भयन्सर्वाश्चयातुधान्योधराचीःपरासुव ५ असौयस्ताम्रोऽअरुणऽउतबभ्रुःसुमङ्गलः ये
चैनंरुद्राऽअभितोदिक्षुश्रिताः सहस्रशोवैषांहेडईमहे ६ असौयोवसर्प्पतिनीलग्रीवोविलोहि
तः उतैनंगोपाअदृश्रन्नदृश्रन्नुदहार्य्यः सदृष्टोमृडयातिनः ७ नमोस्तुनीलग्रीवायसहस्राक्षायमीढु
षे अथोयेऽअस्यसत्वानोहन्तेभ्योकरन्नमः ८ प्रमुञ्चधन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् याश्चतेहस्तइ एम:
षवःपरातांभगवोवप ९ विज्यंधनुःकपर्द्दिनोविशल्योबाणवाँ२उत अनेशन्नस्ययाइषवऽआभुरस्य ४
निषङ्गधिः १० यातेहेतिर्मीढुष्टमहस्तेबभूवतेधनुः तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ११ परि

तेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः अथोयइषुधिस्तवारेऽस्मिन्निधेहितम् । २२ अवतत्यधनुष्ट्वं सहस्राक्ष
शतेषुधे निशीर्य्यशल्यानाम्मुखाशिवोनः सुमनाभव २३ नमस्तआयुधायानाततायधृष्णवे । उभाभ्यामुत
तेनमोबाहुभ्यांतवधन्वने । २४ मानोमहान्तमुतमानोऽअर्भकम्मानउक्षन्तमुतमानःउक्षितम् । मानोवधीःपि
तरम्मोतमातरम्मानःप्रियास्तन्वोरुद्ररीरिषः २५ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोअश्वेषुरी
रिषः मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्वाहवामहे । २६ ॐ अस्त्रायफट् । इतिषडंगन्यासः
अथात्मानंरुद्ररूपंध्यायेत् । तद्यथा । शुद्धस्फटिकसंकाशंत्रिनेत्रंपंचवक्त्रकम् । गंगाधरंदशभुजंसर्वाभ
रणभूषितम् । १ नीलग्रीवंशशांकांकंनागयज्ञोपवीतिनम् । व्याघ्रचर्मोत्तरीयंचवरेण्यमभयप्रदम् । २ क
मण्डल्वक्षसूत्राभ्यामान्वितंशूलपाणिनम् । ज्वलंतंपिंगलजटाशिखामुद्द्योतकारिणम् । ३ अमृतेनाप्लुतंहृ
ष्टमुमादेहार्द्धधारिणं दिव्यसिंहासनासीनंदिव्यभोगसमन्वितम् । ४ दिग्देवतायमायुक्तंसुरासुरनमस्कृत
म् । नित्यंचशाश्वतंशुद्धंध्रुवमक्षरमव्ययम् । ५ सर्वव्यापिनमीशानंरुद्रंवैविश्वरूपिणम् । एवंध्यात्वाद्विजः
सम्यक्ततोयजनमाचरेत् । ६ इतिध्यानम् । अथरुद्राभिषेकविधिः शिवस्यसन्मुखंस्थित्वा । आत्मनि

देवतास्थापयेत् तद्यथा॰ प्रजनने ब्रह्मा तिष्ठतु॰ पादयोर्विष्णुस्तिष्ठतु॰ हस्तयोर्हरस्तिष्ठतु॰ बाह्वोरिन्द्रस्तिष्ठतु॰
जठरेऽग्निस्तिष्ठतु॰ हृदये शिवस्तिष्ठतु॰ कंठे वसवस्तिष्ठंतु॰ वक्त्रे सरस्वती तिष्ठतु॰ नासिकयोर्वायुस्तिष्ठतु॰
नयनयोः सूर्याचंद्रमसौ तिष्ठेताम्॰ कर्णयोरश्विनौ तिष्ठेताम्॰ ललाटे रुद्रास्तिष्ठंतु॰ मूर्ध्न्यादित्यास्ति
ष्ठंतु॰ शिरसि महादेवस्तिष्ठतु॰ शिखायां वामदेवस्तिष्ठतु॰ पृष्ठे पिनाकी तिष्ठतु॰ पुरतः शूली तिष्ठतु॰ पा
र्श्वयोः शिवशंकरौ तिष्ठेताम्॰ सर्वतो वायुस्तिष्ठतु॰ ततो वहिः सर्वतोऽग्निर्ज्वालामालीपरिवृतस्तिष्ठतु॰ स
र्वेष्वंगेषु सर्वे देवास्तिष्ठन्तु॰ मां रक्षन्तु॰ पुनर्नमस्ते षोडश॥ नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो
नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः शष्पिंजराय त्विषीमते पथीनां पतये नमो नमो हरिकेशा
योपवीतिने पुष्टानां पतये नमो नमो बभ्लुशाय १७ नमो बभ्लुशाय व्याधिनेऽन्नानां पतये नमो नमो भवस्य हेत्यै
जगतां पतये नमो नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमः सूतायाहंत्यै वनानां पतये नमो नमो रोहिताय रुम:
१८ नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नमो मन्त्रि ५
णे वाणिजाय कक्षाणां पतये नमो नमः उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नायतया १९

नमस्कृत्स्नायतयाधावतेसत्वानाम्पतयेनमोनमः सहमानायनिव्याधिनऽआव्याधिनीनाम्पतयेनमोनमोनिष
ङ्गिणेककुभायस्तेनानाम्पतयेनमोनमोनिचेरवेपरिचरायारण्यानाम्पतयेनमोनमोवञ्चते॥ २० नमोवञ्चतेप
रिवञ्चतेस्तायूनाम्पतयेनमोनमोनिषङ्गिणइषुधिमतेतस्कराणाम्पतयेनमोनमःसृकायिभ्योजिघांसद्भ्यो
मुष्णताम्पतयेनमोनमोसिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतयेनमोनमः॥ २१ नमउष्णीषिणेगिरिचरायकुलु
ञ्चानाम्पतयेनमोनमइषुमद्भ्योधन्वायिभ्यश्चवोनमोनमआतन्वानेभ्यःप्रतिदधानेभ्यश्चवोनमोनमआय
च्छद्भ्योस्यद्भ्यश्चवोनमोनमोविसृजद्भ्यः॥ २२ नमोविसृजद्भ्योविध्यद्भ्यश्चवोनमोनमःस्वपद्भ्योजाग्रद्
भ्यश्चवोनमोनमः शयानेभ्यआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमोनमःसभाभ्यः॥ २३
नमःसभाभ्यःसभापतिभ्यश्चवोनमोनमोश्वेभ्योश्वपतिभ्यश्चवोनमोनमआव्याधिनीभ्योविविध्य
न्तीभ्यश्चवोनमोनमउगणाभ्यस्तृंहतीभ्यश्चवोनमोनमोगणेभ्यः॥ २४ नमोगणेभ्योगणपतिभ्यश्च
वोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्व
रूपेभ्यश्चवोनमोनमःसेनाभ्यः॥ २५ नमःसेनाभ्यःसेनानिभ्यश्चवोनमोनमोरथिभ्योऽरथेभ्यश्चवोनमो

नमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो ऽअर्भकेभ्यश्च वो नमो नमस्तक्षभ्यः २६ नमो नमस्तक्ष
भ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो
नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो नमः श्वभ्यः २७ नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय
च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्द्दिने। २८ नमः कपर्द्दिने च व्युप्त
6 केशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुम
ते च नमो ह्रस्वाय। २९ नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमो ऽग्र्याय
च प्रथमाय च नमः ऽआशवे। ३० नमः ऽआशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नम ऽऊर्म्याय चा
वस्वन्याय च नमो नादेयाय च द्वीप्याय च। ३१ नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च न
मो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च नमः सोभ्याय। ३२ नमः सोभ्याय च प्रतिस रा०म०
र्याय च नमो याम्याय च क्षेम्याय च नमः श्लोक्याय चावसान्याय च नम ऽउर्वर्याय च खल्याय च नमो व ६
न्याय। ३३ नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नम ऽआशुषेणाय चाशुरथाय च नमः

श्रूरायचावभेदिनेचनमोविल्मिने ३४ नमोबिल्मिनेचकवचिनेचनमोवर्म्मिणेचवरूथिनेचनमःश्रुता
यचश्रुतसेनायचनमोदुन्दुभ्यायचाहनन्यायचनमोधृष्णवे ३५ नमोधृष्णवेचप्रमृशायचनमोनिष
ङ्गिणेचेषुधीमतेचनमस्तीक्ष्णेषवेचायुधिनेचनमःस्वायुधायचसुधन्वनेच ३६ नमःस्रुत्यायचपथ्या
यचनमःकाट्यायचनीप्यायचनमःकुल्यायचसरस्यायचनमोनादेयायचवैशन्तायचनमःकूप्याय
३७ नमःकूप्यायचावट्यायचनमोविद्ध्यायचातप्यायचनमोमेघ्यायचविद्युत्यायचनमोवर्ष्याय
चावर्ष्यायचनमोवात्याय ३८ नमोवात्यायचरेष्म्यायचनमोवास्तव्यायचवास्तुपायचनमःसोमायचरुद्राय
चनमस्ताम्रायचारुणायचनमःशङ्गवे ३९ नमःशङ्गवेचपशुपतयेचनमउग्रायचभीमायचनमोग्रेवधा
यचदूरेवधायचनमोहन्त्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्ताराय ४० नमःशम्भवायचमयो
भवायचनमःशङ्करायचमयस्करायचनमःशिवायचशिवतरायच ४१ नमःपार्य्यायचावार्य्यायचन
मःप्रतरणायचोत्तरणायचनमस्तीर्थ्यायचकूल्यायचनमःशष्प्यायचफेन्यायचनमःसिकत्याय ४२
नमःसिकत्यायचप्रवाह्यायचनमःकिंशिलायचक्षयणायचनमःकपर्दिनेचपुलस्तयेचनमइरिण्याय

चप्रपथ्यायचनमोव्रज्यायः ४३ नमोव्रज्यायचगोष्ठ्यायचनमस्तल्प्यायचगेह्यायचनमोहृदय्यायचनिवे
ष्प्यायचनमःकाट्यायचगह्वरेष्ठायचनमःशुष्क्यायः ४४ नमःशुष्क्यायचहरित्यायचनमःपांसव्या
यचरजस्यायचनमोलोप्यायचनमऊर्व्यायचसूर्म्यायचनमःपर्णायः ४५ नमःपर्णायचपर्णशदायच
नमउद्गुरमाणायचाभिघ्नतेचनमआखिदतेचप्रखिदतेचनमइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमो
वःकिरिकेभ्योदेवानांहृदयेभ्योनमोविचिन्वत्केभ्योविक्षिणत्केभ्योनमआनिर्हतेभ्यः ४६ द्रापेऽ
अन्धसस्पतेदरिद्रनीललोहितः आसांप्रजानामेषांपशूनांमाभेर्मारोङ्मोचनःकिञ्चनाममत् ४७
इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः यथाशमसद्द्विपदेचतुष्पदेविश्वम्पुष्टंग्रामेऽ रुद्रः
अस्मिन्ननातुरम्ः ४८ यातेरुद्रशिवातनूःशिवाविश्वाहाभेषजीः शिवारुतस्यभेषजीतयानोमृडजीव
सेः ४९ परिनोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्मतिरघायोः अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोका
यतनयायमृडः ५० मीढुष्टमशिवतमशिवोनःसुमनाभवः परमेवृक्षआयुधन्निधायकृत्तिंवसानऽआचर ७
पिनाकम्बिभ्रदागहि ५१ विकिरिद्रविलोहितनमस्तेऽअस्तुभगवः यातेसहस्रंहेतयोन्यमस्मन्निवप

श्रुताः ५२ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः तासामीशानोभगवःपराचीनामुखाकृधि ५३ असंखु
ख्यातासहस्राणियेरुद्राऽअधिभूम्याम् तेषां सहस्रयोजनेवधन्वानितन्मसि ५४ अस्मिन्महत्य
र्णवेऽन्तरिक्षेभवाऽअधि तेषां सहस्रयोजनेवधन्वानितन्मसि ५५ नीलग्रीवाःशितिकण्ठादिवं
रुद्राऽउपश्रिताः तेषां ५६ नीलग्रीवाश्शितिकण्ठाशर्वाअधःक्षमाचराः तेषां ५७ येवृक्षे
षुशष्पिञ्जरानीलग्रीवाविलोहिताः तेषां ५८ येभूतानामधिपतयोविशिखासःकपर्दिनः तेषां
५९ येपथाम्पथिरक्षयऽऐलबृदाऽआयुर्युधः तेषां ६० येतीर्थानिप्रचरन्तिसृकाहस्तानिषङ्गि
णः तेषां ६१ येन्नेषुविविध्यन्तिपात्रेषुपिबतोजनान् तेषां ६२ येएतावन्तश्चभूयांसश्च
दिशोरुद्रावितस्थिरे तेषांसहस्रयोजनेवधन्वानितन्मसि ६३ नमोस्तुरुद्रेभ्योयेदिवियेषांवर्षमिषवः
तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशोर्ध्वाः तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुते
यंद्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ६४ नमोस्तुरुद्रेभ्योयेन्तरिक्षेयेषांवातइषवः तेभ्योदशप्राची
र्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशोर्ध्वाः तेभ्योनमोअस्तुतेनोवन्तुतेनोमृडयन्तुतेयंद्विष्मोयश्चनोद्वे ८

ष्ठितमेषाञ्जम्भेदध्मः ६५ नमोस्तुरुद्रेभ्योयेपृथिव्यांयेषामन्नमिषवःतेभ्योदशप्राचीर्दशदक्षिणादशप्रतीची
र्दशोदीचीर्दशोर्ध्वाः तेभ्योनमोऽस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ६६ वय
ꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः प्रजावन्तःसचेमहि ६७ एषतेरुद्रभागःसहस्वस्राम्बिकयातञ्जुषस्वस्वाहैष
तेरुद्रभागऽआखुस्तेपशुः ६८ अवरुद्रमदीमह्यवदेवन्त्र्यम्बकं यथानोवस्यसस्करद्यथानःश्रेयसस्क
रद्यथानोव्यवसाययात् ६९ भेषजमसिभेषजङ्गवेश्वायपुरुषायभेषजम् सुखम्मेषायमेष्यै ७० त्र्यम्बकं
यजामहेसुगन्धिम्पुष्टिवर्द्धनम् उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ७१ त्र्यम्बकंय्यजामहेसुगन्धि
म्पतिवेदनम् उर्वारुकमिवबंधनादितोमुक्षीयमामुतः ७२ एतत्तेरुद्रावसन्तेनपरोमूजवतोतीहि अवततध
न्वापिनाकावसःकृत्तिवासाऽअहिꣳसन्नःशिवोतीहि ७३ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम् यद्देवेषुत्र्या
युषन्तन्नोअस्तुत्र्यायुषम् ७४ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिꣳसीः निर्वर्त्तयाम्यायु एमः
षेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्याय ७५ पुनर्नमस्ते ७६ एषतेरुद्रभागःसहस्वस्राम्बि ८
कयातञ्जुषस्व स्वाहैषतेरुद्रभागऽआखुस्तेपशुः ७७ अवरुद्रमदीमह्यवदेवन्त्र्यम्बकम् यथानोवस्यसस्क

8

रक्ष्याणोअग्नेयसस्करक्ष्याणोभ्यवसाययाता: ७७ एषतेनिर्ऋतेभागस्तञ्जुषस्वस्वाहाग्निनेत्रेभ्योदेवेभ्यःपु
रःसद्भ्यःस्वाहायमनेत्रेभ्योदेवेभ्योदक्षिणासद्भ्यःस्वाहा विश्वेदेवनेत्रेभ्योदेवेभ्यःपश्चात्सद्भ्यःस्वाहामि
त्रावरुणनेत्रेभ्योवामरुन्नेत्रेभ्योदेवेभ्यउत्तरासद्भ्यःस्वाहा सोमनेत्रेभ्योदेवेभ्यउपरिसद्भ्योदुवस्वद्भ्यस्तेभ्यः
स्वाहा ७८ येदेवाग्निनेत्राःपुरःसत्तेभ्यःस्वाहायेदेवायमनेत्रादक्षिणासत्तेभ्यःस्वाहायेदेवाविश्वदेवने
त्राःपश्चात्सत्तेभ्यःस्वाहा येदेवामित्रावरुणनेत्राचोत्तरासत्तेभ्यःस्वाहायेदेवासोमनेत्राउपरिसद्भ्योऽप
सत्तेभ्यःस्वाहा ७९ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः बाहुभ्यामुततेनमः ८० यातेरुद्रशिवातनूर
घोरापापकाशिनी तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि ८१ नमस्तेहरसेशोचिषेनमस्तेऽ
अस्त्वर्चिषे अन्याँस्तेऽअस्मत्तपन्तुहेतयःपावकोऽअस्मभ्यं शिवोभव ८२ नमस्तेऽअस्तुविद्युतेनम
स्तेस्तनयित्नवेनमस्तेभगवन्नस्तुयतःस्वःसमीहसे ८३ नतम्विदाथयऽइमायजानान्यद्युष्माकमन्तरम्ब
भूव नीहारेणप्रावृताजल्प्याचासुतृपऽउक्थशासश्चरन्ति ८४ विश्वकर्माह्यजनिष्टदेवऽआदिद्ग
न्धर्वोऽअभवद्द्वितीय तृतीयःपिताजनितौषधीनामपाङ्गर्भंव्यदधात्पुरुत्रा ८५ मीकुष्टमग्निवतमग्निवो

नः स्मनाभव । परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥ ५१ ॥ विकिरिद्र विलोहित नमस्ते अस्तु भगवः यास्ते सहस्रं हेतयोऽन्यमस्मन्निवपन्तु ताः ॥ ५२ ॥ सहस्राणि सहस्रशो बाह्वोस्तव हेतयः तासामीशानो भगवः पराचीना मुखा कृधि ॥ ५३ ॥ असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ५४ ॥ ॥ इति शतरुद्री ॥ अथ जटाः उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च सासह्वांश्चाभियुग्वा च विक्षिपः स्वाहा ॥ १ ॥ अग्निं हृदयेनाशनिं हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना । सर्वं मतस्नाभ्यामीशानं मन्युना महादेवमन्तःपर्शव्येनोग्रं देवं वनिष्ठुना वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥ २ ॥ उग्रं लोहितेन मित्रं सौव्रत्येन रुद्रं दौर्व्रत्येनेन्द्रं प्रक्रीडेन मरुतो बलेन साध्यान् प्रमुदा । भवस्य कण्ठ्यं रुद्रस्यान्तःपार्श्व्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ॥ ३ ॥ ॐ लोमभ्यः स्वाहा २ त्वचे स्वाहा २ लोहिताय स्वाहा २ मेदोभ्यः स्वाहा २ मांसेभ्यः स्वाहा २ स्नावभ्यः स्वाहा २ अस्थिभ्यः स्वाहा २ मज्जाभ्यः स्वाहा २ रेतसे स्वाहा २ [रेतः] पायवे स्वाहा ॥ ४ ॥ आयासाय स्वाहा प्रायासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा ॥ ५ ॥ [५] शुचे स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय स्वाहा ॥ ६ ॥ तपसे स्वाहा तप्यते स्वाहा तप्य

मानायस्वाहातप्तायस्वाहाघर्म्मायस्वाहा निःकृत्यैस्वाहाप्रायश्चित्यैस्वाहाभेषजायस्वाहा ९५ यमायस्वाहा
न्तकायस्वाहामृत्यवेस्वाहाब्रह्मणेस्वाहाब्रह्महत्यायैस्वाहाविश्वेभ्योदेवेभ्यः स्वाहाद्यावापृथिवीभ्याᳬं
स्वाहा ९६ इमामेअग्नइष्टकाधेनवः सन्त्वेकाचदशचदशचशतञ्चशतञ्चसहस्रञ्चसहस्रञ्चायुतञ्चायुत
ञ्चनियुतञ्चनियुतञ्चप्रयुतञ्चप्रयुतञ्चार्बुदञ्चन्यर्बुदञ्चसमुद्रश्चमध्यञ्चान्तश्चपरार्द्धश्चैतामेऽअग्न
इष्टकाधेनवः सन्त्वमुत्रामुष्मिँल्लोके ९७ स्वस्तिनइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्यो
अरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ९८ पयः पृथिव्यांपयऔषधीषुपयोदिव्यन्तरिक्षेपयोधाः पयस्वतीः
प्रदिशः सन्तुमह्यम् ९९ विष्णोरराटमसिविष्णोः श्नप्त्रेस्थो विष्णोःस्यूरसिविष्णोर्ध्रुवोसिवैष्णवमसिविष्णवेत्वा
१०० अग्निर्देवतावातोदेवतासूर्य्योदेवताचंद्रमादेवतावसवोदेवतारुद्रादेवतादित्यादेवतामरुतोदेवता
विश्वेदेवादेवताबृहस्पतिर्देवतेन्द्रोदेवतावरुणोदेवता १०१ मूर्द्धासिराड्ध्रुवासिधरुणाधर्त्र्यसिधरणी
आयुषेत्वावर्चसेत्वाकृष्यैत्वाक्षेमायत्वा १०२ द्यौःशांतिरन्तरिक्षᳬंशांतिः पृथिवीशान्तिरापःशांतिरोष
धयःशांतिर्वनस्पतयःशांतिर्विश्वेदेवाःशांतिर्ब्रह्मशांतिः सर्वᳬंशान्तिःशांतिरेवशांतिःसामाशान्तिरेधि २

विश्वानिदेवसवितर्दुरितानिपरासुव॰ यद्भद्रंतन्नआसुव॰ ४ सद्योजातंप्रपद्यामिसद्योजातायवैनमः भ
वेभवेनातिभवेभजस्वमांभवोद्भवायवैनमः ५ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःका
लायनमःकलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूतदमनाय
नमोमनोन्मनायनमः ६ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्वेभ्यःसर्वसर्वेभ्योनमस्तेअस्तुरुद्र
10 रूपेभ्यः ७ ॐतत्पुरुषायविद्महेमहादेवायधीमहि तन्नोरुद्रःप्रचोदयात् ८ ईशानःसर्वविद्यानामी
श्वरःसर्वभूतानाम् ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेऽस्तुसदाशिवोम् ९ त्रीणिपदाविच
क्रमेविष्णुर्गोपाअदाभ्यः अतोधर्माणिधारयन्तद्विप्रासोविपन्यवोजागृवा १० सःसमिन्धतेवि
ष्णोर्यत्परमंपदम् इतिमाध्यन्दिनीयाऽभिषेकाध्यायःसमाप्तः॥ ॥ॐसाशिरसाहस्ताभ्यांमनसाश्रद्धयापि
वा पद्भ्यांकराभ्यांकर्णाभ्यांप्रणामोष्टांगउच्यते १ ॐसाष्टांगप्रणाम्य· हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातः एमः
पतिरेकआसीत् सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेमः २ शिरसाप्रणाम्य· शुभम· १०
भूयात्लेखकपाठकयोः लिखितमिदंपुस्तकंरामप्रसादेन· स्वार्थंपरार्थंवा॥ ॥श्रीसांबशिवायनमः

आत्मात्वंगिरिजामतिःसहचराःप्राणाःशरीरंगृहंपूजातेविषयोपभोगरचनासम्यक्समाधिस्थितिः संचा
रःपदयोःप्रदक्षिणविधिस्तोत्राणिसर्वागिरोयद्यत्कर्मकरोमितत्तदखिलंशंभोतवाराधनम्· ९ कर
चरणकृतंवाकायजंकर्म्मजंवाश्रवणनयनजंवामानसंवापराधम्· विहितमविहितंवासर्वमेतत्क्षमस्व
जयजयकरुणाब्धेश्रीमहादेवशंभो·॥ ॥इतिशिवस्तोत्रम्·॥ ॥शुभम्

एकादशावर्तनेतुरुद्रीत्समभिधीयते एकादशाभिरेताभिःरुद्रःओंमनीषिभिः
रुद्रैकादशभिश्चापिमहारुद्रःप्रकीर्तितः एकादशमहारुद्रैर्महारुद्रीनिगद्यते
एकादशभिरेताभिरतिरुद्रीनिगद्यते अतिरुद्राच्चसर्वस्मात्पापस्सञ्जायते रामः

सम्यक्प्रज्ञायते ताद्भवति यदि गर्भेन्नु तत्र्यतत ध्वंसो भवति अधिकांशेन मनुष्य तत्क्षतो भवति
यदि कामम् अनुतल्पोत्संल्पवत स्मायो निःशंद स्यामदिदमजमां ततः संभवति ...
सोरसोरसः शोणितं शोणितान्मांसं मांसान्मेदो मेदसः स्नायवः स्नायुभ्योऽस्थीन्यस्थिभ्यो मज्जा
मज्जातो रेतः शुक्रशोणितसंयोगात् ततः पिण्डः संभवति शुक्रातिरेके पुमान्भवति शोणितातिरेके स्त्री भव
ति द्वाभ्यां समेन नपुंसको भवति शुक्रभिन्नेन यमो भवति शुक्रशोणितसंयोगान्मातापितृसं
योगाच्चतुर्विधमिदं शरीरं संप्रवर्तते भवति एकरात्रोषितं कललं भवति पंचरात्राद्बु
द्बुदः सप्तरात्रात्पेशी द्विसप्तरात्रादर्बुदः पंचविंशतिरात्रे स्वस्थितो घनो भवति मासमा
त्रात्कठिनो भवति द्विमासाभ्यन्तरे शिरः संपद्यते मासत्रयेण ग्रीवाव्यादेशो मासचतुष्के
त्वग्व्यादेशः पंचमे मासे नखरोमव्यादेशः षष्ठे मुखनासिकाक्षिश्रोत्रं च भवति
सप्तमे चलनसमर्थो भवति अष्टमे बुद्ध्याध्यवसायति नवमे सर्वाङ्गसंपूर्णो भवति ...
स्मरति जातीः ... नानायोनिसहस्राणि दृष्ट्वा ... निरुध्यमानेन ...
... नानाविधाश्च ... मातापितृ ... संयोगः ...
... सांख्ययोगं ... पञ्चविंशकमिति ... दशमे मासे
प्रजायते ... वायुना ... स्मरति जन्ममरणानि ... शुभाशुभं च कर्म विन्दति ...
संपूर्णम् इति गर्भोपनिषत् ...